कर्म्म० णत्वम् । अग्रयायिसैन्ये । "अग्राणीकं रघुव्याघ्रौ राक्षसानां बभञ्जतुः इति" रामा० ।

**अग्रायणीय** न० अग्रं श्रेष्ठमयनं ज्ञानं तत्र साधु छ । बौद्धागमसिद्धे प्रवादभेदे "उत्पादपूर्व्वमग्रायणीयमथ वीर्य्यता प्रवादः स्यात् इति" हेमचन्द्रः ।

**अग्रावलेहित** न० अग्रं प्रथमभाग उद्धृत्यावलेहितमास्वादितं यस्य । श्राद्धाद्यर्थप्रस्तुतान्नादग्रभागमुद्धृत्यास्वादनेन श्राद्धं दानाद्यनर्हताप्रयोजकदोषदुष्टे अन्नादौ "द्विःस्विन्नं परिदग्धञ्च तथैवाग्रावलेहितमिति" श्राद्धवर्ज्ये ब्रह्मपुराणम् "अग्रावलेहितं श्राद्धार्थोपकल्पितं सक्तुदुपभुक्ताग्रभागमिति" रघु० ।

**अग्रासन** न० अग्रमर्घादिदानात् पूर्व्वं कल्पितमासनम् । श्राद्धान्नभोजनार्थं अर्घदानादितोऽग्रे कल्पिते विप्रस्योपवेशनार्थे आसने "मामग्रासनतोऽवकृष्टमवशमिति" मुद्रा० ।

**अग्राह्य** त्रि० ग्रह-ण्यत्-न० त० । ग्रहणायोग्ये शिवनिर्म्माल्यादौ प्रतिग्रहायोग्ये तिलाश्वादौ च । "अग्राह्यं शिवनिर्म्माल्यं पत्रं पुष्पं फलं जलमिति" पुरा० । "ब्राह्मणः प्रतिगृह्णीयाद्वृत्त्यर्थं साधुतस्तथा । अव्यश्वमपि मातङ्गतिललौहांश्च वर्ज्जयेत् । कृष्णाजिनद्वयग्राही न भूयः पुरुषोभवेत् । शय्यालङ्कारवस्त्रादि प्रतिगृह्य मृतस्य च । नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा" । तथा "ब्रह्महत्या सुरापानमपि स्तेयं तरिष्यति । आतुराद्यद्गृहीतन्तु तत् कथं ? वै तरिष्यति" । "एतदादिद्रव्यादानं गृहीतुर्दोषजनकम्" इति रघु० । "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः । अन्यत्र कुलटाषण्डपतितेभ्यो द्विषस्तथेति" मनुः । तेन कुलटादिद्रव्यम् अग्राह्यम् । शौचादौ कर्म्मणि अनुपादेयमृत्तिकायाम् स्त्री । "अन्तर्जले देवगृहे वल्मीके मूषिकस्थले । कृतशौचावशिष्टे च अग्राह्याः पञ्च मृत्तिका" इति स्मृतिः । अविचारणीये त्रि० "अग्राह्यस्त्वनिवेदित" इति स्मृतिः । आवेदनकालेऽनिवेदितः पश्चात् निवेदितोऽपि व्यवहारे न विचारणीयः इति तदर्थः ।

**अग्रिम** पु० अग्रे भवः अग्र+डिमच् । ज्येष्ठभ्रातरि । श्रेष्ठे, * उत्तमे च त्रि० । "वीराणामग्रिमो भूत्वा युयुधे पार्थिवैः सहेति" पुरा० ।

**अग्रिय** पु० अग्रे भवः अग्र+घ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे, अग्रजातमात्रे च त्रि० । "सन्ध्या अग्रिया भवन्तीति ता० ब्रा० ।

**अग्रीय** पु० अग्रे भवः अग्र+छ । ज्येष्ठभ्रातरि । श्रेष्ठे, उत्तमे च त्रि० । "अग्रीयभागं ददतेऽस्य दैत्या" इति वेदः ।

**अग्रु (ग्रू)** स्त्री अगि-क्रु नलोपः वा ऊङ् । नद्यामङ्गुल्याञ्च । निरुक्तौ तन्नाम्नोरेतस्या उक्तेस्तदर्थत्वम् । "जनीयन्तोन्यग्रुव" इति वेदः ।

**अग्रेग** त्रि० अग्रे गच्छतीति गम-ड अलुक् स० । पुरोगन्तरि ।

**अग्रेगा** त्रि० अग्रे गच्छति गम-विट् अलुक् स० । पुरोगन्तरि ।

**अग्रेगू** त्रि० अग्रे गच्छतीति गम-डू अलुक् स० । पुरोगामिनि सेवके ।

**अग्रेदिधिषु (षू)** पु० दिधिं धैर्य्यं स्यति निरस्यति, सो-कू षत्वम् दिधिषूः द्विरूढा पुनर्भूर्योषित् अग्रे गणनीया दिधिषूर्यस्य अलुक् स० कबभावः पृ० वा ह्रस्वः । पुनर्भूविवाहकारिणि । प्रागनूढज्येष्ठभगिन्याः प्रागूढकनिष्ठभगिन्यां स्त्री । "ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा तु दिधिषूः स्मृतेति, मनुः एतत्पक्षे च अग्रे ज्येष्ठाविवाहात् पूर्व्वं दिधिषूः ज्येष्ठाविवाहकाला सहनरूपधैर्य्यलोपकारिणीति विग्रहः । दीर्घान्त एवायम् ।

**अग्रेदिधिषूपति** पु० ६त० । अनूढज्येष्ठायां भगिन्याम् सत्यां कनिष्ठायाभगिन्या वोढरि "यस्याग्रेदिधिषूपतिरिति" स्मृतिः ।

**अग्रेपा** त्रि० अग्रे स्थित्वा पाति पा-क्विप् अलुक् स० । पुरतोभूत्वा पालके "अग्रेपा ऋभवो मन्दसाना" इति वेदः ।

**अग्रेपू** त्रि० अग्रे कृत्वा पूयते पू-क्विप् अलुक् स० । पुरः पवित्रकारके "सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुव" इति वेदः ।

**अग्रेवण** वनस्याग्रं-राज०पूर्व्व० अलुक् स० णत्वम्, नि० एदन्तत्वम् । वनाग्रभागे । [गामिनि । स्त्रियां ङीप् ।

**अग्रेसर** त्रि० अग्रे सरति सृ-ट-अलुक् स० । पुरो-

**अग्रेसरिक** त्रि० सृ-भावे-अप् अलुक् स० अग्रे सरे अग्र गतौ प्रसृतः ठन् । पुरोगामि-सेवके ।

**अग्रोपहरणीय** त्रि० अग्रमुपह्रियते यस्मै उप+हृ-सम्प्रदाने अनीयर् । श्राद्धाद्यर्थमुपकल्पितस्यान्नादेरग्रे दानोद्देश्ये वास्तुदेवादौ । अग्रे उपह्रियते कर्म्मणि अनीयर् । प्रथमदानार्हे द्रव्ये । ["दृश्यते त्वग्र्यया बुद्ध्येति" गीता ।

**अग्र्य** पु० अग्रेजातः यत् । ज्येष्ठे भ्रातरि । श्रेष्ठे त्रि०

**अघ** इदित् गतौ भ्वादि०आत्म० सक०सेट् । अङ्घते । आङ्घिष्ट । क्रि-अङ्घिः असुन् अङ्घः ।

**अघ** पापकरणे अदन्तचुरा० उभय० अक० । अघयति-ते । आजिघत् त । अच्-अघम् अघः ।